स्वल्पत्वाधिक्यं अल्पान्तरत्वाददोषः। अथ वा व्यासोऽयूनकया न्यूनः कार्य्यः। ध्वजायसिद्धिश्च। अथ वा किमेतावता प्रयासेन लघुत्रिकोणं कुण्डं क्षेत्रं द्वादशांशः तत्क्षेत्रफलं स्यात् द्वादशगुणितं पूर्णं क्षेत्रफलम्। अथेदं कुण्डं स्वबुद्धिविलासमात्ररचितमिति नोपेक्षणीयं यतः षट्कोणता समभुजताफलं च सम्पद्यते एव "मानाधिक्ये भवेद्रोगो मानहीने दरिद्रता" इत्यादिदोषापत्तिरपि नास्ति। अथ वक्तव्यं प्राचीनकृतकुण्डविरुद्धत्वर्हि दृश्यते च प्राचीनकृतकुण्डेषु परस्परविरुद्धता इदमेव कुण्डं रामवाजपेयिभिर्विषमभुजं स्वदङ्काकारं कृतं राघवभट्टादिभिः समभुजमेव कारितं लक्ष्मणाचार्यादयोऽप्यन्यथैवोचुः तस्मादस्मदुक्ते नेतरमणोये समभुजे क्षेत्रफलसंवादिनि षट्-कोणे विद्वद्भिर्नानादरं भाव्यमिति। अथ ये प्राचीनकृतावेवाग्रहिणस्तेषान्तोषायापि समभुजमाह "अथ वा जिनभक्तकुण्डमानात्त्रिथिभागैः स्वखभूपभागहीनैः। मितकर्कटकोद्भवे तु वृत्ते विधुदिक्षु समषड्भुजैः षडस्रम्" अथ वा चतुर्विंशतिभक्ते कुण्डमाने सति स्वीयषष्ट्यधिकशतभागेन हीनैः पञ्चदशभागैर्मितोग्रः कर्कटस्तदुद्भवे वृत्ते उत्तरदिक्षु समागमात् समैः षड्भुजैश्चैः परस्परलग्नैः षडस्रं वृत्तमार्जनेन भवतीति व्याख्या। अथ क्षेत्रफलानयनं तत्र वृत्तव्यासे द्विसंभागे षडस्रे स्युर्भुजाः स्फुटा' इति भुजमानम् १४। ७। २। २ क्षेत्रमध्ये दक्षिणोत्तरां रेखान्दत्त्वा ऊर्द्ध्वं भुजसंपाततः पूर्व्वापरं रेखाद्वयम् अधोभुजसंपातावधि दद्यात् एवं कृते चतुरस्रद्वयं परस्परलग्नं भवति पूर्व्वापररेखयोर्दक्षिणोत्तररेखया सह सम्पातस्तुर्य्यांशे एव भवति सैवाबाधा तन्मानं ७।३।५ भुजः १४।७।२ "स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः" इति साधितो लम्बः १२।७।१। अयमेव मध्यलम्बः "लम्बेन निघ्नं कु २९।६।४ मुखैः १४।७।५।२ क्य ४४।५।६ खण्डम्" २२।२।७। इति जातं क्षेत्रफलं २८८।१।१।६ एवमपरस्यापि खण्डस्य। उभययोगे ध्वजायसिद्धिश्चेति। अथ पद्मकुण्डमाह "अष्टांशाद्युतस्य वृत्तपरके तन्नादिमे कर्णिकायुग्मे षोडश केशराणि चरमे स्यादष्टतिभागोनिते। भक्ते षोडश केशराणि च वृते स्युः कर्कटेऽष्टौ छदाः सर्वांस्तान् खन कर्णिकां त्यज निजायामौच्च्यकं स्यात् कजम्"। क्षेत्रस्याष्टमांशादष्टांशवृद्ध्या च वृत्तपञ्चके कृते सति तत्र पञ्चकमध्ये प्रथमं तत्कर्णिका, द्वितीये षोडश केशराणि, द्वितीयं केशरस्थानमित्यर्थः। अन्तिमे पञ्चमे वृत्ते स्वस्य अङ्गुलत्रयात्मकस्याष्टत्रिंशदंशोनितस्य षोडशसु स्थानेषु दिक्षु विदिक्षु तदन्तराले च समतया भाजिते तस्मिन् वृत्ते पञ्चचिह्नान्तरे दिशि विदिशि च कर्कटके धृते सति परावर्त्तनेनाष्टौ पत्राणि जायन्ते सर्वांस्तान् केशरादीन् केशरवृत्ततृतीयचतुर्थवृत्तानि पत्राणि च हे विद्वन्! खन कर्णिकां त्यज मा खन। कीदृशीं निजः स्वकीयस्यायामो विस्तारस्तत्तुल्यमौच्च्यं यस्यास्तां, कजं पद्मकुण्डम् बहिर्वृत्तमार्जनेन स्यादिति व्याख्या। अथ क्षेत्रफलानयनम् अत्रोपान्तिमस्य चतुर्विंशत्यङ्गुलस्य पूर्व्ववत् क्षेत्रं ४५।२।३।१ अन्तिमवृत्तस्यास्य २८।३।४। क्षेत्रफलं ६९९।४।५।०। अनयोरन्तरार्द्धम् १२३।४।६।० इदं पूर्व्वक्षेत्रफले योजितं वा अन्तिमवृत्तक्षेत्रफलम्। प्रवर्त्तितं सञ्जातं पूर्णं फलं ५७६।०।१ यूकोनं फलमायात्यतोऽदोषः। अन्तिमवृत्ते लिख्यमानत्वबद्धमेन ध्वजायसिद्धिश्चेति। अत्रान्तिमवृत्ते पत्रान्तरार्द्धभूसंग्रहेऽर्द्धभूत्यागश्च बुद्धिमता प्रत्यक्षत एवोपलब्धव्यः। अथाष्टास्रिकुण्डमाह "क्षेत्रे जिनांशे गजचन्द्रभागैः स्वाष्टाब्धि-२८ भागेन युतैस्तु वृत्ते। विदिग्दिशोरन्तरतोऽष्टसूत्रैस्तृतीययुक्तैरिदमष्टकोणम्"। क्षेत्रचतुर्विंशतिभागे कृते सत्यष्टादशभागैः स्वीयाष्टाविंशेन युतैः कर्कटकेन वृत्ते कृते सति विदिग्दिशोर्मध्ये कृताष्टचिह्नेभ्यः अष्टभुजेभ्यस्तृतीयांशमिलितैः चिह्नद्वयं विधाय तृतीयचिह्नेन योजितैरष्टकोणं वृत्तमार्जनान्मध्यस्याष्टदोःखण्डमार्जनाच्च भवतीति व्याख्या। अथ "क्षेत्रफलानयनं व्यासार्द्धं १८।५।१।०। व्यासः २७।२।२। अथ "द्विद्विनन्देषुसागरैर्वृत्तव्यासे समाहते। खखखाभ्रार्कसंभक्ते लभ्यन्ते क्रमशो भुजाः" इति १४।२ एतद् वृहद्भुजमानं दक्षिणोत्तररेखा कोटिः आयते क्षेत्रे भुजकोटिघातः क्षेत्रफलम्। भुजकोटिमानं तु वृहद्भुजतुल्यं मध्येऽन्तरम् १४।२।२ याम्योत्तररेखोभयप्रान्तवर्त्तिरेखा खण्डमाने योजितं सा कोटिः स्यात् यथा दक्षिणोत्तरपूर्व्वापररेखा खण्डयोगादूर्ध्वरेखातिर्य्यग्रेखे भुजकोटिरूपे तद्याम्यायमानो महाभुज एव कर्णः १४।२।२।५।० अस्य वर्गार्द्धमूलं तिर्य्यग्रूपभुजकोटिमानं लघुः १०।०।६।२। यतोऽत्र भुजकोटिवर्गयोगः कर्णवर्गो भवति इदं कोटिमानं द्विघ्नं सत् पूर्व्वभुजे योजितं जाता कोटिः दक्षिणोत्तररेखारूपा ३४।३।५।४। एतद्वृहद्भुजघातफले ४९२ १।१।२। अथ कोणक्षेत्रयोः फलं लघुभुज-वर्गेण तुल्यमेतत् १०१।७।६। पूर्व्वफलादस्मा ४९२।